# Shrikrishnalila Ratnapanchakam 3

# શ્રીકૃષ્ણલીલા રત્નપઞ્ચકમ્ ૩

## Document Information

Text title : Shrikrishnalila (Ratnapanchakam 3)

File name : shrIkRRiShNalIlA.itx

Category : vishhnu, viShNu, krishna

Location : doc_vishhnu

Author : Kalyanasevaka

Proofread by : Brahatha Mohan

Latest update : May 22, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 22, 2026

*sanskritdocuments.org*

# શ્રીકૃષ્ણલીલા રત્નપઞ્ચકમ્ ૩

(રત્નપઞ્ચકે તૃતીયં રત્નમ્ ।)

ગોવર્ધનધર ! ગોપીવલ્લભ ! ગોપાલ ! ગોપ ! ગોવિન્દ ! ॥

પ્રસીદ પરમાનન્દ ! પાવન ! પરમાત્મકૃષ્ણ ! પાપઘ્ન ! ॥ ૧॥

વૃન્દાવનસુરભૂરુહતલાસીનપાર્થસારથિં કૃષ્ણમ્ ॥

સુવેણુનાદવિનોદં વિષ્ણું વન્દે વનમાલાકણ્ઠમ્ ॥ ૨॥

પ્રણમ્ય કૃષ્ણં હ્યતિશુદ્ધરૂપં
સાક્ષાત્પ્રભું રામમજસ્વરૂપમ્ ।
વદામિ કિઞ્ચિત્સ્વનુભૂતમાત્રં
શ્રીકૃષ્ણલીલામમનસ્ત્વસિદ્ધ્યૈ ॥ ૩॥

કાલિન્દીયમુનાજલેષુ બહુષઃ શ્રીકૃષ્ણલીલાઽભવ-
તચ્ચિત્સૌખ્યસુસક્તવારિષુ નરૈઃ સ્નાત્વા મુદા પ્રેમતઃ ।
સન્ધ્યાદૌ હરિચન્દનં હ્યતિશુભં શ્રીકૃષ્ણનામામૃતૈ-
ર્મિશ્રીકૃત્ય સુધાર્યતાં સુવિમલં મૂઢૈરપિ પ્રોચ્ચકૈઃ ॥ ૪॥

યલ્લિપ્તં પ્રતિનિત્યમર્ચનવિધૌ ભક્તૈઃ પ્રભૌ ચન્દનં
ગોપીભિઃ સ્વકરૈસ્તદેવ સલિલૈઃ પ્રક્ષાલિતં પ્રેમતઃ ।
ગોપીચન્દનનામતસ્તદભવ ચ્ચિત્સૌખ્યસઙ્ગાત્પ્રભોઃ
પાપઘ્નં ધરણીતલે નિજમુખે યો ધારયેન્મુક્તિભાક્ ॥ ૫॥

ઊર્ધ્વં પુણ્ડ્રં ધારયેદ્વિષ્ણુભક્તઃ
સંન્યાસી વા બ્રહ્મચારી ગૃહસ્થઃ ।
શઙ્ખં ચક્રં સર્વચિહ્નાનિ સમ્યક્
તત્તત્સ્થાને ધ્યાનયુક્તં સુભક્ત્યા ॥ ૬॥

હૃદયકમલે ધ્યાત્વા કૃષ્ણં હરિં પ્રભુમચ્યુતં

નિયતમનસા પૂર્ણાત્માનં સદૈવ જગદ્વિભુમ્ ।
હૃદિ શિરસિ યો બાહૌ કણ્ઠે નરોઽત્ર સુધારયે-
દિહપરસુખં કૃષ્ણપ્રીત્યા નિજામૃતમાપ્નુયાત્ ॥ ૭॥

કમલનયનં મેઘશ્યામં તનૌ સમલઙ્કૃતં
દ્વિભુજમમલં ગોપીપ્રાણં સુરદ્રુમમશ્રિતમ્ ।
રસતિ ભજતિ જ્ઞાનાનન્દો ન્વિહાચલભક્તિતો
વનચરગવીમધ્યે કૃષ્ણં સ મુક્તિમવાપ્નુયાત્ ॥ ૮॥

ઈડ્યઃ કૃષ્ણઃ સુરમુનિજનૈર્ગોપગોપીસમેતો
યઃ કાલિન્દીસલિલલહરીસઙ્ગિવાતેન સેવ્યઃ ।
એકો નિત્યો વિવિધરહિતોઽદ્વૈતમાત્રોઽપિ લીલાં
કુર્વાણોઽજોઽજ્ઞજનસુહિતાર્થાય દેહં દધાનઃ ॥ ૯॥

કૃષ્ણો હિ બ્રહ્મચારી સરસિ કમલવચ્છ્રેષ્ઠ એવાવતારે
ભૂમ્યાં સાક્ષાત્સ્વરૂપઃ પ્રકટિતવિમલો લોકકલ્યાણકારી
સર્વે ગાયન્તિ કૃષ્ણં ત્રિગુણવિરહિતં ગોપગોપીસમેતં
નાનાલીલાં સ્વમાયાં મુનિહૃદયહરાં દર્શયન્તં જનાનામ્ ॥ ૧૦॥

ગર્ભજન્મમૃત્યુરોગતાપપાપહારકઃ
શક્તિયુક્તિભુક્તિભક્તિસર્વદાયકઃ પ્રભુઃ ।
સ્ત્રીસુયુક્ત -ગોપબાલ -પાર્થસારથિર્હરિ-
ર્બ્રહ્મ નિત્યશુદ્ધબુદ્ધમુક્તસત્સુખાત્મકમ્ ॥ ૧૧॥

ક્રોધકામલોભમોહદમ્ભદર્પમત્સરાઽઽ-
દુષ્ટદૈત્યનાશતો ભજેત્સુધીઃ સુભાવતઃ ।
શાન્તિદાન્તિવેદસારકૃષ્ણભક્તિમેવ તાં
નિત્યસિદ્ધમુક્તકૃષ્ણવસ્તુ લભ્યતે તતઃ ॥ ૧૨॥

વક્રદન્તકેશિકંસપૂતનાદિરાક્ષસ-
સ્વસ્થસર્વદોષરૂપનાશતઃ સ્વયં પ્રભુઃ ।
સ્વસ્વરૂપસિદ્ધગુહ્યશાશ્વતં નિજપ્રભં
બ્રહ્મ કૃષ્ણ એવ રાજતે સદા મુદા હૃદિ ॥ ૧૩॥

રામકૃષ્ણવાસુદેવનારસિંહવામનઃ
પદ્મનાભમાધવત્રિવિક્રમાચ્યુતાવ્યયઃ ।
શ્રીધરો જનાર્દનો હ્યધોક્ષજોઽદ્વયો વિભુ-

બ્રહ્મ કૃષ્ણ એવ નારદાદિમૌનિસેવિતઃ ॥ ૧૪॥

નારાયણો રઘુવરો જ્ઞવરૈઃ સુસેવ્યો
દામોદરો હરિહરોઽપ્યનિરુદ્ધવિષ્ણુઃ ।
સઙ્કર્ષણશ્ચ મધુસૂદનગોપિકાહૃ-
ત્પદ્માસનસ્થવિમલો ભગવાન્વરેણ્યઃ ॥ ૧૫॥

વિજ્ઞાનરૂપપરિપૂર્ણમનાદ્યનન્તં
બ્રહ્માત્મવસ્તુ સુખકેવલસુજ્ઞસેવ્યમ્ ।
ગોવિન્દવેણુધરગોપસુચિત્તચોરં
કૃષ્ણં પરાત્પરતરં શરણં વ્રજેન્ના ॥ ૧૬॥

કૃષ્ણો બ્રહ્મૈવ સાક્ષાજ્જનવિજનસમઃ સ્ત્રીપુમાન્ભેદશૂન્યો
ગોપીગોપાદિલીલાં ભ્રમનિરતજનાઃ સર્વસત્યાં વદન્તિ ।
નાનાસ્ત્રીબાલલીલા ગુણરહિતગુણે કલ્પના કા કથં સ્યા-
ત્કૃષ્ણજ્ઞાનાય તસ્માદ્વિષયસુરમણં ત્યજ્યતાં શીઘ્રમેવ ॥ ૧૭॥

કંસોઽહઙ્કાર આદૌ નિયમિતમનસા કૃષ્ણભક્ત્યા વિલીનઃ
કર્તવ્યઃ સાધકેન પ્રથિતશમદમા ઉદ્ધવાક્રૂરરૂપાઃ ।
દુર્બોધં બ્રહ્મ કૃષ્ણં વિરહિતવિષમં  સચ્ચિદાનન્દપૂર્ણં
જ્ઞાત્વા હ્યત્યન્તયત્નૈર્નિરતિશયસુખં કૃષ્ણભાવં લભેત્સઃ ॥ ૧૮॥

દ્વેષશ્ચાણૂરનામા હ્યતિનિજમહિમા મુષ્ટિકો મત્સરો વૈ
ગર્વઃ કંસશ્ચ દર્પઃ સહજકુવલયાપીડ એવાતિદુષ્ટઃ ।
તન્નાશાનન્તરં વૈ સુમધુરલલનાગોપિકાધ્યાતરૂપઃ
શ્રીકૃષ્ણો બ્રહ્મ પૂર્ણં સતતમુપનિષત્સારભૂતં ચકાસ્તિ ॥ ૧૯॥

સકામોઽકામો ભવતિ સ્મૃત્વા કૃષ્ણં ચ ગોપિકાઃ ॥

જલં તીર્ત્વા ભવામ્બોધેઃ પરં પારં ગતા યથા ॥ ૨૦॥

બ્રહ્માનન્દો ગોપિકાપ્રીતિપાત્રં
કૃષ્ણઃ શાન્તઃ શુદ્ધમાયાવિહીનઃ ।
ગોપો બાલઃ શુદ્ધચિત્તેન નિત્યં
ધ્યાતવ્યશ્ચિત્સાધકૈઃ પ્રેમભક્ત્યા ॥ ૨૧॥

ગીતાપ્રોક્તં પાર્થરૂપેણ નિત્યં
સ્વસ્મિંજ્ઞાત્વા સ્વેન, માયાવિમોહમ્ ।

ત્યક્ત્વાઽદ્વૈતં કેવલં બ્રહ્મ પૂર્ણં
કૃષ્ણાત્માનં ભાવયેદ્વસ્તુમાત્રમ્ ॥ ૨૨॥

વિશ્વેઽસ્મિન્ખલુ ચરજઙ્ગમે મુરારિઃ
સર્વાત્મા સતતવિશુદ્ધમૂર્તિરસ્તિ ।
કલ્યાણં પરમપવિત્રકૃષ્ણમત્ર
જ્ઞાત્વા સ્વં સ્વનુભવતશ્ચ મુક્તિભાક્સઃ ॥ ૨૩॥

મનોવાચાતીતં પરમપુરુષં કૃષ્ણમમલં
સ્વમાત્રં સ્વસ્મિન્સદ્ધ્યનુભવપરં કેવલમજમ્ ।
કથં કો નિઃશબ્દં નિરવયવનિત્યં નિરુપમં
કયા સામગ્ર્યા વા પ્રવદતિ મહદ્બ્રહ્મ વિબુધઃ ॥ ૨૪॥

કલ્યાણસેવકકૃતાઽમલકૃષ્ણલીલા
લીલા હરેદ્ધૃદયરાગવિકલ્પલીલામ્ ।
શ઼ૃણ્વન્તિ યે ચ કથયન્તિ કથામમૂં તે
ભક્તા ભવન્તિ ગૃહબન્ધનતો વિમુક્તાઃ ॥ ૨૫॥

ઇતિ શ્રીસમર્થરામદાસ-કલ્યાણસેવકપદાન્વિત-
કલ્યાણસેવકપ્રણીત રત્નપઞ્ચકે તૃતીયં રત્નં
શ્રીકૃષ્ણલીલાનામ સમ્પૂર્ણમ્ ॥

Proofread by Brahatha Mohan

*Shrikrishnalila Ratnapanchakam 3*
pdf was typeset on May 22, 2026

Please send corrections to *sanskrit@cheerful.com*